N. A.
Mudraprakash
मुद्रा प्रकाश
Sanskrit
Printed on paper
Sambat 1941
Folio: 18
13"x5"
Complete

मुद्राप्रकाश

॥ श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपासदाऊअग्निहोत्रीकेयहां
सिद्धविनायकयंत्रमेमुद्राप्रकाशछापागया लि॰ वंसीधरमिश्र छापनेवाला
मान जिसेलेनाहोयउसेढुंढिराजगणेशकेपासदाऊअग्निहोत्रीके दुकानपरमि
लेगा॰

मु॰प्र॰ १ श्रीगणेशायनमः द्रुहिणहरिहराद्यैर्देववृन्दैर्नमस्यं यदभिमतमर्थं भक्तिभाजां जनानाम् परिहृतसकलार्थैर्योगिभिर्ध्यायमा
नहरचरणसरोजं क्षेमकामा भजध्वम् १ नत्वा गुरुपदं रामकिशोरेणेष्टसिद्धिदम् साधकानां मुदे मुद्राप्रकाशोयं विरच्यते।
२ देवानां मुदं हर्षं राति ददातीति मुद्रा तथा च मंत्रदर्पणे रचनां सम्यग्ज्ञात्वा पूजायां दर्शयेन्मुद्रां तदियं मुद्रा कथिता देवे॥
ध्यायन्मुदं राति मुदं रातीति मुद्रा स्यादित्यन्यत्र कुलार्णवे मुदं कुर्वंति देवानां मनांसि द्रावयंति च तस्मान्मुद्रा इति प्रोक्ता द-
र्शितव्याः कुलेश्वरि दर्शितव्या इति दर्शयितव्या इत्यर्थः पूजाकाल इति शेषः यलोपश्छांदसः गौतमीये दशमाध्याये-
मोदनात्सर्वदेवानां द्रावणात्पापसंततेः मुद्रास्ताः कथिताः सद्भिर्देवसान्निध्यदायिकाः यामले मोदनात्सर्वदेवानां द्राव।
णात्पापसंततेः तस्मान्मुद्रेयमाख्याता सर्वकामार्थसाधिनी मंत्रदर्पणे नादीक्षितसुरचयेत्तु क्षुभ्यंति हि देवता यस्मात्
मुद्रा भवंति विफलाः सापि च रोगी दरिद्रः स्यात् अंकुशाख्या भवेन्मुद्रा तीर्थावाहनकर्मणि उच्यते लक्षणं तस्या यदुक्तं मंत्रदर्पणे
तीर्थान्यावाहयेन्मंत्री मुद्रयांकुशरूपया अंकुशाख्या दक्षमुष्टेरंकुशाकृततर्जनी ज्ञानार्णवेपि चतुर्थपटले मुष्टिं बध्वा दक्ष
करे तर्जन्यंकुशरूपिणी अंकुशाख्या च मुद्रा वै त्रैलोक्याकर्षिणी भवेत् रक्षणे कुन्तमुद्रोक्ता तस्या लक्षणमुच्यते तंत्रसारे।
मुष्टामूर्द्ध्वीकृतांगुष्ठां तर्जन्यग्रे तु विन्यसेत् सर्वरक्षाकरी ह्येषा कुंतमुद्रा प्रकीर्तिता इति कुंभमुद्राभिषेके स्यात्तस्या लक्षण

मुच्यते मंत्रदर्पणे। वामांगुष्ठेदक्षांगुष्ठंक्षिप्त्वाद्वाभ्यांहस्ताभ्यांचेत् मध्याकाशांमुष्टिंकुर्य्यात्कुंभाख्येयंमुद्राप्रोक्ताम।
ध्याकाशांमध्यशून्यांतत्रैवस्नानप्रकरणे दक्षांगुष्ठंवाममुष्टौतदन्यामुष्टिपार्श्वगाः कुर्य्यात्तामंतराकाशांकुंभमुद्रा
भिषेचने तदन्यांअंगुष्ठभिन्नादक्षांगुल्यः मुष्टिपार्श्वगाः वाममुष्टिपार्श्वगाः तांवाममुष्टिंअंतराकाशांमध्यशून्यांगो
तमीयेसप्तमाध्यायेवामहस्तकृतांमुष्टिंदक्षहस्तेनवेष्टयेत् कलशाख्याभवेन्मुद्रासर्वपापहराशुभा तंत्रांतरेदक्षां
गुष्ठंपरांगुष्ठेक्षिप्त्वाहस्तद्वयेनच सावकाशांमुष्टिमेकांकुर्यात्साकुंभमुद्रिका परांगुष्ठेवामांगुष्ठ सावकाशांमध्यशू
न्यां कथितातत्वसंज्ञातुमुद्रावद्धणुकर्मसु साऽतुअंगुष्ठानामिकामेलनरूपा तथाचत्तानार्णवेत्रयोदशपटले अंगुष्ठा
नामिकाभ्यांतुतत्वमुद्रेयमीरिताइति कालकर्णीप्रयोक्तव्याविघ्नप्रशमकर्मणि उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्पणे
कृत्वोन्नतेचवद्धेमुष्ट्योः संलग्नयोर्युगयोः तेत्वभिवक्त्रेकुर्याद्विघ्नघ्नीकालकर्णिकामुद्रा तथातंत्रसारेपि० अंगुष्ठावुन्न
तौकृत्वामुष्ट्योः संलग्नयोर्द्वयोः तावेवाभिमुखौकुर्य्यान्मुद्रैषाकालकर्णिका मुद्रातत्वासुदेवाख्याध्यानेतल्लक्षणंय।
था मंत्रदर्पणे अंजलिमुद्रांजलिवत्सैवस्याद्वासुदेवाख्या तथातंत्रांतरे अंजल्यंजलिमुद्रास्याद्वासुदेवाह्वयाचसा अंज।
लीतिविभक्तिलोपश्छांदसः अथमात्रिकान्यासमुद्राः मंत्रदर्पणे मध्यानामेस्मृतेभालेवृद्धानामेचचक्षुषोः शीर्षे

मु॰प्र ष्ठकरयत्तसंधिपार्श्वेषुमध्यमामत्ता वृद्धाश्रवणयोरुक्तासकनिष्ठान्वितानसोः गंडास्येमध्यगास्तिस्रोः नामिकाऽन्त
२ जिह्वयोः पृष्ठेतिस्रः कनिष्ठाद्याः नाभौवृद्धान्वितास्तास्ताः जठरेकथिताः सर्वास्तलमुक्तं हृदादिषु कथितामातृकामुद्रा
याभिर्न्यासः फलप्रदः नेत्रांतरे ललाटेऽनामिकामध्येविन्यसेन्मुखपद्मके तर्जनीमध्यमानामावृद्धानाभचनेत्रयोःअं
गुष्ठंकर्णयोर्न्यस्यकनिष्ठांगुष्ठकौनसोः मध्यास्तिस्रोगंडयोश्चमध्यमांचोष्ठयोर्न्यसेत् अनामांदंतयोर्न्यस्यमध्यमांचोत्त
मांगके मुखेनामांमध्यमांचहस्तेपादेचपार्श्वयोः कनिष्ठानामिकामध्यास्तास्तुपृष्ठेचविन्यसेत् ताःसांगुष्ठानाभिदेशे
सर्वाः कुक्षौचविन्यसेत् हृदयेचतलसर्वंमंसयोश्चककुत्स्थले हृत्पूर्वहस्तयत्कुक्षिमुखेषुतलमेवच एताश्चमातृ
कामुद्राःक्रमेणपरिकीर्तिताः अज्ञात्वाविन्यसेद्यस्तुन्यासःस्यात्तस्यनिष्फलाः मुखेनामांमध्यमामित्यत्रमुखपदंजिह्वाप
रमितिपूर्वेणा विरोधः अतएवव्यामेन्द्रोरसनाणेकर्णिकमित्यादौरसनापदेनविसर्गोगृह्यते इतिकिंत्विदमात्राबधेयम्।
पार्श्वयोरित्यस्यकनिष्ठाऽनामिकामध्याइत्यनेनैवसंबंधोनतुमध्यमामित्यनेनतास्तुपृष्ठेचविन्यसेदित्यत्रताइत्यस्यवैय
र्थ्यापत्तेः सर्वंचशीर्षोष्ठकरपत्तसंधिपार्श्वेषुमध्यमामतेत्तिमंत्रदर्पणकारेणायदुक्तंतच्चिंत्यम् अंगुल्यग्राणामनुक्तत्वाच्च राम
मंत्रदर्पणाकारोक्तंचिंत्यमितिशेषः अथांगन्यासमुद्राः मंत्रदर्पेण हृन्नेत्रैस्त्रिभिराख्यातंद्वाभ्याम स्वशिरोमतम् अंगुष्ठे २

नशिखान्तेयादिग्भिः कवचमीरितम् दिग्भि र्दशभिः तंत्रांतरे हृदयेमध्यमानामातर्जनीभिर्न्यसेद्बुधः मध्यमातर्जनीभ्यां
चशिरसिन्यासमाचरेत् अंगुष्ठेनशिखायांचदशभिः कवचेन्यसेत् नेत्रेयत्रिस्त्रिभिश्चस्यादस्त्रमूर्ध्वोर्ध्वगंदिशः मध्यमा।
तर्जनीभ्यांस्यादंगमुद्राः स्मृताइमाः यामले० हृदयंमध्यमानामातर्जनीभिः स्मृतंशिरः मध्यमातर्जनीभ्यांस्यादंगुष्ठेनशि
खास्मृता दशभिः कवचंप्रोक्तंत्रिस्त्रिभिर्नेत्रमीरितम् प्रोक्तांगुलिभ्यांमस्त्रंस्यादंगन्यासविधिरियंमता त्रिस्त्रिभिस्तर्जनीमध्य।
मानामाभिः तर्जनीमध्यमानामाः प्रोक्तानेत्रत्रयेक्रमात् यदिनेत्रद्वयंप्रोक्तंतत्रतर्जनीमध्यमे इतिभट्टघ्नवचनादित्तितंत्रसारकारः प्रोक्तांगुलि
भ्यामध्यमातर्जनीभ्यां स्त्रस्त्रमुद्रायांविशेषोयथा। मंत्रदर्पणे दक्षस्यतर्जनीमध्येसव्यकरतलेक्षिपेत् अभिघातेनशब्दः स्यादस्त्र।
मुद्रासमीरिताइति वेस्मवेत्तु० विशेषोयथा मंत्रदर्पणे हृदिशीर्षेनिरंगुष्ठाश्चतस्त्रोदशवर्मणि सरलांगुष्ठमुष्टिस्तुशिखा।
यांस्यादधोमुखी ऊर्द्धीभूतभुजद्वंद्वमुष्ट्यंगुष्ठप्रदेशिनी संभवध्वनिरस्त्रस्याद्दिक्षोमुद्राचनेत्रयोः दक्षस्यतर्जनीमध्येनरसिंहे
तरस्यतु तथानंत्रसारे अनंगुष्ठाऋजवोहस्तशाखाभवेन्मुद्राहृदयेशीर्षकेच अधोङ्गुष्ठाखलुमुष्टिः शिखायांकरद्वंद्वांगुलयो
वर्मणिस्युः नाराचमुष्ट्युद्धृतवाहुयुग्मकांगुष्ठतर्जन्युदितोध्वनिस्तुविश्वग्विशक्ताकथितास्त्रमुद्रायत्राक्षिणीतर्जनीमध्यमेच

मु॰ प्र॰ यत्राक्षिरणीन्यनंतरं तत्रैतत्पथ्याहार्जेम् तथाचायमर्थः यत्राक्षिरणीनेत्रहृदयंतत्रनेत्रन्यासेतर्जे नीमध्यमेवेदितव्ये यत्रैतिनर
३ सिंहेतरविष्णुमंत्रेइत्यर्थः नरसिंहस्यतुत्रिनेत्रत्वात्तन्नेत्रन्यासेतर्जन्यांगुलित्रयरूपापूर्वोक्तैव मुद्राबोध्या अन्येतुसक
लान्यासाः कर्तव्यास्तत्वमुद्रया तथाचगौतमीयेतृतीयाध्याये मनसैवन्यसेन्मासानुपुष्पेणैवयथामुने अंगुष्ठानामि
काभ्यांवाअन्यथाविफलंभवेत् इति सौभाग्यदंडिनीम्मुद्रांरिपुजिह्वाग्रहांतया श्रीविद्याविषयन्यासकालेसंदर्श
येत्सुधीः तथाचज्ञानार्णवेद्वादशपटले अथवक्ष्येमहेशानि श्रीविद्यान्याससुत्तमम् संपूर्णांचिंतयेद्विद्यांब्रह्मरं
ध्रेरुणप्रभां स्रवत्सुधांषोडशार्णांमहासौभाग्यदांस्मरेत् वामांसदेशेसौभाग्यदंडिनीम्भ्रामयेत्ततः रिपुजिह्वाग्रहां
मुद्रांपादमूलेप्रविन्यसेत् इत्युक्तान्यासजालमुक्तं एतयोर्लक्षणंउक्तंयथा मंत्रदर्पणे वामकरेणतुमुष्टिंबध्वासर
लांतुतर्जनींकृत्वा संभ्रामयेच्चवामकर्णेन्यासेसौभाग्यदंडिनीमुद्रा अंगुष्ठांतर्मुष्ट्यात्रैलोक्यंसन्निरुध्येव वामांघ्रित॰
लेन्यास्यासारिपुजिह्वाग्रहामुद्रा २ ज्ञानार्णवेपिद्वादशपटले॰ वामहस्तेनमुष्टिंतुबध्वाकर्णप्रदेशके तर्जनींसरलां॰
कृत्वाभ्रामयेन्मनुवित्तमः सौभाग्यदंडनीमुद्रान्यासकालेतुसूचिता १ अंतरांगुष्ठमुष्ट्यातुनिरुध्यजगतीमिमां रिपुजि॰ राम
ह्वाग्रहामुद्रान्यासकालेतुसूचिता २ तत्रांतरेतु रिपुजिह्वाग्रहांमुद्रांवामपादतलेन्यसेत्॥ इत्युत्तरार्द्धम्॥ मुद्राद्वयमिदं ३

दक्षिणहस्तेनापिभवतीतिमतम् तथाचतंत्रांतरे० अंगुष्ठांतर्दक्षमुष्टिर्वैरिजिह्वाग्रहामता सरलातर्जनीसैवमुद्रासौभा
ग्यदंडिनी अन्यत्रापि दक्षमुष्टिंदृढंबध्वातर्जनींप्रविसारयेत् भ्रामयेद्वामकर्णाधोमुद्रासौभाग्यदंडिनी ९ अंगुष्ठगर्भितांमु
ष्टिंबध्वादक्षिणपाणिना रिपुजिह्वाग्रहामुद्रावामपादतलेन्यसेदिति अत्रैतामितिकर्मपदमध्याहार्य्यम् एतानिवचनानि
श्रीविद्यान्यासप्रकरणे मंत्रदर्पणाकारधृतानि १० कूर्ममुद्रासमाख्याता देवताध्यानकर्मणि उच्यतेलक्षणंतस्यायदुक्तंमं
त्रदर्पणे वामपैत्रेतीर्थेतस्यांगुष्ठेचतर्जन्यां दक्षस्याधोवदनमध्यानामेप्रदेशिनीस्वल्पां वामस्यान्यास्तिस्रोदक्षस्योर्ध्वा
ननाः पृष्ठे उन्नतदक्षांगुष्ठंकच्छपपृष्ठप्रभंदक्षं पाणिंकृत्वाध्यायेत्कच्छपमुद्रासमाख्याता वामकरस्यतर्जन्यंगुष्ठमध्ये
दक्षिणकरस्याधोमुखमध्यमानामिकेयोजयेत् पुनस्तस्यवाम स्यांगुष्ठेदक्षस्यमध्येप्रदेशिनींतर्जनींपुनर्वामस्यतर्जन्यां —— ॥
॥ —— दक्षस्यस्वल्पांकनिष्ठांअन्याअवशिष्टास्तिस्रोमध्यमानामाकनिष्ठाऊर्ध्वाग्रदक्षस्यपृष्ठेयोजयेत्पुनरुक्तंतंदक्षिणांगुष्ठं
कृत्वादक्षपाणितलंकूर्मपृष्ठवत्कुर्य्यादित्यर्थः। अन्यत्रापि० वामहस्तस्यतर्जन्यांदक्षिणस्यकनिष्ठकां तथादक्षिणतर्जन्यांवा
मांगुष्ठंनियोजयेत् उन्नतंदक्षिणांगुष्ठंवामस्यमध्यमादिकाः अंगुलीर्योजयेत्पृष्ठेदक्षिणस्यकरस्यच वामस्यपितृतीर्थेनमध्य
मानामिकेतथा अधोमुखेचतेकुर्याद्दक्षिणस्यकरस्यच कूर्मपृष्ठसमंकुर्याद्दक्षपाणिंचसर्वतः कूर्ममुद्रेयमाख्यातादेवताध्या

नकर्मणि पृष्टेक्रोडे इतितंत्रसारकारः ११ त्रिखंडात्रिपुराध्यानेतस्यालक्षणमुच्यते मंत्रदर्पणे प्रटितौचकरौकुर्यादद्द
मध्याकनिष्टिकाः सरलाः वद्धेचतर्जनीभ्यां परिवर्त्यानामिकेत्रिखंडेयम् वामकेश्वरतंत्रेच परिवर्त्यकरौस्पृष्टावंगु
ष्टौकारयेत्समौ अनामांतरगतेकृत्वातर्जन्यौकुटिलाकृती कनिष्टिकेनियुंजीतनिजस्थानेमहेश्वरी त्रिखंडेयंसमाख्या
तात्रिपुराध्यानकर्मणि ज्ञानार्णवेपिद्वादशपटले पाणिद्वयंमहेशानिपरिवर्तेनयोगतः योजयित्वातर्जनीभ्यामनामे।
धारयेत्प्रिये मध्यमेयोजयेन्मध्येकनिष्टेतदधस्तथा अंगुष्टावपिसंयोज्यविधायुग्माक्रमेणतु त्रिखंडानाममुद्रेयंरिपु
संक्षोभकारिणीति १२ शिखयागालिनींमुद्रामर्घस्यपरिचालयेत् उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्पणे पृष्टेपृष्टंदत्वा
वध्वांगुष्टौकनिष्टाभ्याम् कुर्यादपराः सरलामुद्रेयंगालिनीकथिता अन्यत्रापि॰ कनिष्टांगुष्टकौसक्तौकरयोरितरेतरं।
म् तर्जनीमध्यमानामाः संहताभुग्नवर्जिता मुद्रैषागालिनीप्रोक्ता शंखस्यायविशोधने गौतमीयेनवमाध्यायेदशकृत्वो
जयेन्मूलंगालिनींशिखयान्यसेत् करौप्रसार्यचान्योन्यंसंपुटक्रमयोगतः प्रयोज्यदक्षिणांगुष्टंतथावामकनिष्टया वा
मांगुष्टंदक्षिणयामुद्रेयंगालिनीमता अर्घ्यस्यफलदाप्रोक्ता शंखस्यापरिचालिता शिखयावषट्कारेणदक्षिणयाद
क्षिणकनिष्टया १३ मत्स्याख्यामुद्रयान्वर्घ्यपात्रमाच्छादयेत्सुधिः उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्पणे दक्षिणाकरस्यपृ

वामकरतलमधविन्यस ——— सम्यक्चलितांगुष्ठौकुर्यान्मत्स्यस्वरूपिणींमुद्रां अन्यत्रापि दक्षपाणिपृष्ठदेशेवाम
पाणितलंन्यसेत् अंगुष्ठौचालयेत्सम्यक्मुद्रेयंमत्स्यरूपिणी १४ मुद्रास्तुदेवताव्हानेनवप्रोक्तामनीषिभिः आवाहनी।
स्थापनीचतृतीयासन्निधायनी तुर्यासन्निरोधनीस्यात्सन्मुखीकरणीपरा सकलीकरणीषष्ठीसप्तमीत्ववगुंठनीयामृती
करणीप्रोक्ताधेनुमुद्रात्तुसाष्टमी परमीकरणीमुद्रानवमीपरिकीर्तिता क्रमेणलक्षणान्यासांप्रोक्तानिमंत्रदर्पणे उत्ता
नांजलिमूर्द्ध्नीत्वायद्वावधःकुर्यात् आवाहनीयमुदितात्वधोमुखीस्थापनीचसैवस्यात् ह्याविति द्वौवाराविल्यर्थः २
आश्लिष्टमुष्टियुग्मसोद्वांगुष्ठैवसन्नीधानेस्यात् अंगुष्ठगर्भिणीयंचविख्यातासन्निरोधेहि ४ द्वावुत्तानौमुष्टीकृताविपंसमुखी
करणे ५ देवषडंगन्यासः सकलीकरणमिहसंप्रोक्तम् ६ वामकरविरचिताचेत्सरलाधोवदनतर्जनीमुष्टिःस्यादवगुंठन
मुद्रासत्यभितोभ्रामिताकवचात् भ्रामितेतिवामावर्तेनक्रमेण कवचादितिकवचमुच्चार्येत्यर्थः कवचंहुंइति मुद्रेयंक
रद्वयेनापिभवतीत्यन्येगौतमीयवचनेज्ञानार्णवीयवचनेचस्फुटीभविष्यति ७ मिलितामियोभिवदनाः नामास्वल्पाप्र०
देशिनीमध्या गोमुद्रेयंकथितावरुणेनतयामृति कुर्यात् वरणेनवरुणावीजेनवंद्रूत्यनेन ८ ग्रथितांगुष्ठौचमिथःप्रसारि
ताः स्युपरांगुल्यः परमीकुर्यादनयाकथिताकविभिर्महामुद्रा ९ गौतमीयेदशमाध्याये० ऊर्द्ध्वांजलिमधःकुर्यादियमावा

मु॰प्र॰ हनीभवेत् १ सेयन्तु विपरीता स्यान्मुद्रा स्थापनकर्मणि विपरीतेत्यधोमुखीत्यर्थः २ बाह्यांगुष्ठद्वये मुष्टी मुद्रा स्यात्सन्निधाप
५ नी ३ अंगुष्ठगर्भिणी सैव मुद्रा स्यात्सन्निरोधनी ४ उत्तानमुष्टियुगला सन्मुखीकरणी मता ५ अन्योन्यं तर्जनीयुग्मभ्रमणा
दवगुंठनी ६ अन्योन्यमिति अन्योन्याभिमुखगमनपूर्वकमित्यर्थः तथा च दक्षिणतर्जन्या दक्षिणावर्तेन वामतर्जन्या
वामावर्त्तेन भ्रमणादवगुंठनी मुद्रा भवतीति फलितार्थः तत्रैव अंगुलीः सहिताः कृत्वा करयोर्वामदक्षयोः दक्षानामा
समायुक्ता वामहस्तकनिष्ठिका वामानामासमायुक्ता दक्षपाणिकनिष्ठिका दक्षस्य मध्यमाक्रान्ता वामहस्तस्य तर्जनी वामम
ध्यमयाक्रान्ता दक्षहस्तस्य तर्जनी संयुक्तौ कारयेद्विद्वानंगुष्ठावुभयोरपि धेनुमुद्रा निगदिता गोपिता साधकोत्तमैः ७ ज्ञानार्ण°
वे चतुर्थपटले आवाहन्यादिमुद्रास्तु कथयामि तवानघे ऊर्द्ध्वांजलिमधः कुर्यादियमावाहनी भवेत् अत्रांजलिपदमनामा
मूलपर्वणोरंगुष्ठाग्रद्वयसंयोगयुक्तांजलिपरम् मंत्रसारधृतवक्ष्यमाणतंत्रान्तरवचनैकवाक्यत्वात् एवं पूर्वोक्तवचनयोर
पि बोध्यम् इयन्तु विपरीता स्यात्तदा वै स्थापनी भवेत् मिलितमुष्टियुगलं सन्निधापनरूपिणी ३ अंतरांगुष्ठमुष्टिभ्यां सन्निरो
धनरूपिणी अत्रोत्तरांगुष्ठेत्युपादानाद्वचनान्तरैकवाक्यत्वाच्च पूर्वमुद्रायां मुष्टियुगलस्य बाह्यांगुष्ठत्वमवगम्यत इत्यवधेयम् ४ एतस्या
एव मुद्रायास्तर्जन्यौ सरले यदा अवगुंठनमुद्रेयं सर्वकार्यानुसाधनी तर्जन्यौ सरले इति कृत्वाऽभितो भ्राम्यते शेषा वचनान्तरैकवाक्य त्वात् ५ ५

सकलीकरणंनाममुद्रेयंव्याप्तिरूपिणी रैव्यंगेइति अत्रदेवीपदमुपलक्षणम् ६ करावेकत्रसंयोज्यआरात्रिकविधौप्रिये
परमीकरणंनाममुद्रेयंतु ततः परम् ॥ आरात्रिकमिवेति त्रिकोणवदित्यर्थः आरात्रिकविधाविति पाठे तु त्रिकोणाकाराविः
त्यर्थः ७ परिवृत्य करौ पश्चात्तर्जनीमध्यमे युते कनिष्ठानामिकांगुष्ठं परस्परयुतं कुरु ॥ धेनुमुद्रेयमाख्याता अमृतीकरणे
भवेत् ८ तंत्रसारे० हस्ताभ्यामंजलिंबध्वानामिकामूलपर्वणोः अंगुष्ठौ निक्षिपेत्सेयंमुद्रात्वावाहनी स्मृता १ अधोमुखी
त्वियं चेत्स्यात्स्थापनीमुद्रिका स्मृता २ उच्छ्रितांगुष्ठमुष्ट्योस्तु संयोगात्सन्निधापनी ३ अंतःप्रवेशितांगुष्ठा सैव संरोधनी
मता ४ उत्तानमुष्टियुगला सन्मुखीकरणी स्मृता ५ देवतानांषडंगानांन्यासः स्यात्सकलीकृतिः ६ सव्यहस्तकृतामुष्टिर्दीर्घाधो
मुखतर्जनी अवगुंठनमुद्रेयमभितो भ्रामिता मता ७ अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः तथैव तर्जनीमध्याधेनुमु
द्रा प्रकीर्तिता अमृतीकरणं कुर्यात्तया साधकसत्तमः ८ अन्योन्यग्रथितांगुष्ठा प्रसारितपरांगुलीः महामुद्रेयमुदिता परमीक
रणे बुधैः ९ प्रयोजयेदिमामुद्रां देवताह्वानकर्मणि २३ लेलिहानाममुद्रातुजीवन्यासे प्रकीर्तिता उच्यते लक्षणं तस्या यदुक्तं
मंत्रदर्पणे स्युरधोवक्त्रा सुसमा मध्यानामा प्रदेशिन्यः स्वल्पासरलांकुर्यात्क्षिप्त्वावृद्धामनामयाम् जीवन्यासे विहिता संप्रो ॥
क्ता लेलिहा मुद्रा स्वल्पां कनिष्ठां तंत्रसारे तर्जनीमध्यमानामाः समां कुर्यादधोमुखाः अनामायां क्षिपेद्वृद्धामृज्वीं कृत्वा कनिष्ठिकां

लेलिहानाममुद्रेयंजीवन्यासेप्रकीर्त्तिता॰ २४ अथगंधादिमुद्राः॰ तंत्रसारे॰ मध्यमानामिकांगुष्ठैरंगुल्यग्रेणपार्वति दद्याच्च
विमलंगंधंमूलमंत्रेणसाधकः १ अंगुष्ठतर्जनीभ्यांचपुष्पंचक्रेनिवेदयेत् २ यथागंधंतथादेवीधूपंदद्याद्विचक्षणः मध्यमा
नामिकाभ्यांतुमध्यपर्वणिदेशिकः अंगुष्ठाग्रेणदेवेशिधृत्वाधूपंनिवेदयेत् ३ तालत्रंत्रिधाकृत्वागायत्र्यामूलयोगतः ३ तत्वा
ख्यमुद्रयादेवीनैवेद्यंविनिवेदयेत् ४ मूलेनाचमनंदद्यात्तांबूलंतत्वमुद्रया ५ पुष्पदानमुद्राज्ञानार्णवेपिचयोदशपटले॰ पु॰
ष्पंसमर्प्ययेद्देविमुद्रयाज्ञानसंज्ञयाअंगुष्ठतर्जनीयोगाज्ज्ञानमुद्राप्रकीर्त्तिता २९ प्राणादिमुद्रानैवेद्यंदत्वासंदर्शयेत्सुधीः ता॰
सांस्वरूपंयथा कनिष्ठानामिकेअंगुष्ठेनस्पृशेदिति प्राणमुद्रा १ अनामामध्यमेअंगुष्ठेनस्पृशेदित्यऽपानमुद्रा २ मध्य
मातर्जन्यावंगुष्ठेनस्पृशेदितिव्यानमुद्रा ३ तर्जनीमध्यमानामाअंगुष्ठेनस्पृशेदित्युदानमुद्रा ४ तर्जन्याद्यंगुलिचतुष्टयमंगुष्ठे
स्पृशेदितिसमानमुद्रा ५ तथाचमंत्रदर्पणेकालीपूजाप्रकरणे अंगुष्ठेनकनिष्ठादिपूर्वपूर्वेवियोगतः ॥ अनुलोमेनयुग
णेविलोमान्विचतुःस्पृशेत् बालाविलासतंत्रेपि कनिष्ठानामिकेऽनामामध्येमध्यांसतर्जनीम् तर्जन्यादित्रयंतुर्यमंगु
ष्ठेनस्पृशेत्क्रमात् प्राणापानव्यानोदानसमानास्तेहिद्वानिमाः ताएवाः प्राणादिमंत्रामुद्राः पूर्वोदिताःप्रिये॥ ओंप्राणाय
स्वाहेत्यादयः प्राणादिमंत्राः कनिष्ठानामिकेत्यादिनाक्रमादित्यंतेनोक्ताः प्राणादिमुद्राइत्यर्थः पूर्ववदेवप्राणमुद्रा १ अथवा

मध्यमातर्जन्यावंगुष्ठेन स्पृशेदिति अपानमुद्रा २ अनामामध्यमे अंगुष्ठेन स्पृशेदिति व्यानमुद्रा ३ उदानमुद्रा समानमुद्रापि च
पूर्ववत् ४ तथा च मंत्रचिंतामणौ कनिष्ठानामिके मध्या तर्जन्यौ द्वयोस्पर्शेन अनामामध्यमे निस्सत्तर्जन्याद्याश्चतस्रक
इति प्राणादिमुद्रावास्वतंत्रतंत्रसंमताः तर्जन्याद्याइति काकाक्षिन्यायेनोभयत्रसंबध्यते चतस्रकाइति ऋकारयुक्तपूर्वस
पिकचिह्नकृत्वान्नात्रछंदोभंगः यथा० ॥ कस्त्वंखर्वेद्विजोहंकुत इह हन्नृपते दर्शिशाण्णार्थी मरेवस्मिन् स्वर्णगां च गृहाणत्रिप
दपरिमितां —— भूमिमभ्यर्थयामि तुभ्यंदत्तेति यावद्ददाति बलिरसौ तावदेवत्रिपादै स्त्रैलोक्याक्रांतमूर्तिः प्रहसित
वदनो वामनः पातु युष्मान् क्रमदीपिकायां च स्पृशेत्कनिष्ठापकनिष्ठिके द्वे स्वांगुष्ठमूर्द्धा प्रथमेह मुद्रा १॥ तथापरा तर्जे
निमध्यमे स्यात् —— अनामिकामध्यमिके च मध्या ३ अनामिका तर्जनिमध्यमास्या ४ तद्वच्चतुर्थी सकनिष्ठिकाः स्युः स्या
सचमीनहृदितिप्रदिष्टाः ५ प्राणादिमुद्रा निजमंत्रयुक्ताः प्राणापानव्यानोदानसमानाः क्रमाच्चतुर्थ्यंयुक्ता तारा द्याः व
ध्वा चेह्या कृष्णाध्वनस्त मनवः तारा द्याः प्रणावाद्याः कृष्णाध्वनोऽग्नेर्वध्वा स्वाहयाद्याः शोभिताः अंते इति शेषः तथा च
ॐ प्राणाय स्वाहा इत्यादयः पंच प्राणादिमंत्राम्नानुच्चरन् क्रमेण प्राणादिमुद्रा दर्शयेदिति यामलेप्यास मुद्रा प्युक्ता अंगुल्यः

मु॰प्र॰ ७ कुटिलीभूताविरलाग्राः परस्परम् ग्रासमुद्रासमाख्याता सव्यपार्श्वे नियोजिता प्राणेऽपानस्ततो यस्तु व्यानश्चोदानएवच
समानः पंचमो ज्ञेयः प्राणाः पंचसमीरणाः अंगुष्ठेनसमायुक्ताकनिष्ठानामिकातथा प्राणमुद्रासमाख्याता प्राणाहवनकर्मणि
१ तर्जनीमध्यमांगुष्ठैस्त्रिभिरेकीकृतंयदि स्यादपानहुतौमुद्रा २ तथानामिकमध्यमा अंगुष्ठेनसमायुक्तानियुक्ताव्यानहो
मके ३ निष्कनिष्ठेनयामुद्रासोदानहवनेस्मृता ४ सर्वाभिः संस्मृता मुद्रासमानाहुतिकर्मणि ५ एतानिवचनानिचतुर्दे
शोद्दासेसक्तानंदतरंगिणिकारधृतानि रामकिशोररचितेग्रंथेमुद्राप्रकाशाख्येइतिसाधारणमुद्रानिर्णयआदिपरिच्छेदः १
शिवविष्णुदिनेशानांगणेशांबिकयोरपि ॥ कथ्यंतेमुद्रिकास्तत्रदशमुद्राशिवस्यतु लिंगयोनित्रिशूलाख्यामालेष्टाभीमृगा
ह्वया खड्गाख्याकपालाख्यातथाडमरुनामिका अथैतासांलक्षणानिनिगद्यंतेक्रमेणहि मंत्रदर्पणे उच्छ्रितंदक्षांगुष्ठंवा
मांगुष्ठेनवंधयेद्धीमान् वामांगुलीश्चपश्चाद्दक्षाभिर्वंधयेद्वहिर्लिंगम् १ दक्षाभिरंगुलीभिःलिंगमितिलिंगमुद्रेत्यर्थः सन्मुखौ
तुकरौकृत्वा मध्यमापृष्ठसंस्थिते वक्राभ्यांतर्जनीभ्यांतुनिबध्नीयादनामिके कनिष्ठेद्विनियुंजीतमध्यमाकोडदेशके कनि
ष्ठयोरग्रसंस्थावंगुष्ठौयोनिरीरिता २ तिस्रः प्रसारयेच्चैदंगुष्ठेनचकनिष्ठिकांवध्वा एषात्रिशूलमुद्रादक्षिणहस्तस्थिताकथि राम ७
ता ३ तर्जन्यंगुष्ठाग्रेग्रथितेकृत्वाप्रसारयेदपराः तिस्रोंगुलीश्चमिलिताः कविभिः कथितास्समालेयम् ४ कुरुवरदाभयमुद्रे

वरदाभयवत्करौ कृत्वा सरलाः सकलांगुल्योंऽगुष्ठं निक्षिप्य तर्जनीमूले ६ मध्यनामाशिरसि बद्ध्वा शिखरं नियुंजी
त रेषा मृगमुद्रा स्यादवशिष्टे समुच्छ्रिते कुर्यात् ७ दक्षिणपंचांगुलयो मिलिताद्र्ध्व समुन्नताः कार्याः खट्वांगा
ख्या मुद्रा प्रियकृत् प्रोक्ता शिवस्यापि ८ पात्रमिव वामहस्तं कृत्वांगे वामके न्यस्य कुर्यादुच्छ्रितवच्चेत्कपालमुद्रा
भवेदेषा ९ दक्षिणमुष्टिं शिथिलां कृत्वा किंचित्समुच्छ्रितां मध्यां संचालयेच्च कर्णे प्रभवति खलु डमरुमुद्रेयम् १० तत्र सारे उच्छ्रितं दक्षिणां
गुष्ठं वामांगुष्ठेन बंधयेत् वामांगुलीर्दक्षिणाभिरंगुलिभिश्च बंधयेत् लिंगमुद्रेयमाख्याता शिवसान्निध्यकारिणी १ मिथः
कनिष्ठिके बध्वा तर्जनीभ्यामनामिके अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः अंगुष्ठाग्रद्वयं न्यस्य योनिमुद्रेय
मीरिता २ अंगुष्ठेन कनिष्ठां तु बध्वा श्लिष्टांगुलित्रयम् प्रसारयेत्त्रिशूलाख्या मुद्रेषा परिकीर्तिता ३ अंगुष्ठतर्ज
न्यग्रे तु ग्रथयित्वांगुलित्रयम् प्रसारयेदक्षमाला मुद्रेयं परिकीर्तिता ४ अधःस्थितो दक्षहस्तः प्रसृतो वरमुद्रि
का ५ ऊर्ध्वीकृत्वो वामहस्तः प्रसृतोभय मुद्रिका ६ प्रसृतो निकुब्जः पाणिर्निकुब्जः प्रसृत इत्यमरः मिलिता
नामिकांगुष्ठं मध्यमाग्रे नियोजयेत् श्लिष्टांगुल्यच्छ्रिते इति नाम प्रकृतिश्छांदसत्वात् ७ पंचांगुल्यो दक्षिणास्तु
मिलिता ह्यूर्ध्वमुन्नताः खट्वांगमुद्रा विख्याता देवस्यातिप्रियामता देवस्य शिवस्य ८ पात्रवद्वामहस्तं तु कृ०

मु·प्र· त्वांगे वामके तथा निधायाकुञ्चितं कुर्यान्मुद्रा कापालिकी मता ९ मुष्टिं च शिथिलां बध्वा ईषदुच्छ्रितमध्यमां द
८ क्षिणां तूर्ध्वमुन्नम्य कर्णदेशे प्रचालयेत् एषा मुद्रा डमरुका सर्वविघ्नविनाशिनी १० एतानि वचनानि तंत्रसार
कारधृतानि ध्यानात्पूर्वमिमा मुद्राः पूजांते वा प्रदर्शयेत् बोद्धव्यमेवमन्यामुद्रे वतास्वपि साधकैः तथा च मंत्रदर्प
णे मुद्राः संदर्श्य दिग्बंधं कृत्वा ध्यायेज्जगत्प्रभुम् इति तंत्रसारकारेणापि सामान्यपूजापद्धतौ न्यासजालमुक्त्वा तत्त
त्तत्कल्पोक्तमुद्राः प्रदर्श्य ध्यानं कृत्वा मानसैः संपूज्य· शंखस्थापनं कुर्यादित्युक्तं सनत्कुमारतंत्रेपि· पीठस्यार्चे
नमंगदेवयजनं प्राणप्रतिष्ठां ततः आह्वानं निजमुद्रिका विरचनं ध्यानं प्रभोः पूजनमिति· पंचायतनदीक्षाप्रकर·
णे तंत्रसारकारधृतमेतत् ज्ञानार्णवेपि द्वादशपटले न्यासजालमुक्त्वा प्राणानायम्य विधिवन्मुद्रासन्नद्धविग्रहः इत्य
भिधाय क्षोभणद्रावणाकर्षवश्योन्मादमहांकुशाः खेचरीबीजयोन्याख्यान वमुद्रास्त्वनुक्रमात् इत्युपक्रम्य तत्तन्मुद्रा
मुक्त्वा एवं विन्यस्तदेहः सन्मुद्रासन्नद्धविग्रहः अंतर्यागविधिं कुर्यात्तेन साक्षात्स्वयं विभुः इत्यभिधाय द्वादशपटलं समाप्य त्रयो
दशपटले ध्यानमुक्त्वा ऽतर्यागविधिरुक्तः पूजांते मुद्राप्रदर्शनापि तत्रैवोक्ता तथा च सर्वोपचारैराराध्य मुद्राः संदर्शयेत्
क्रमादिति गौतमीयेष्टमाध्याये पूजांते ॥· नवीननीरदश्यामं नीलेंदीवरलोचनम् वल्लवीनंदनं वंदे कृष्णं गोपालरूपिणमित्यादिस्तुति

स्कारमाचरेदित्युक्तम् एकत्र निर्णीतः शास्त्राधड्निन्यायेन व्यवस्थायाः साधारणात्त्वोध्येति द्विजातिनारामकिशोरनाम्ना
मुद्राप्रकाशे रचिते द्वितीये अयं परिच्छेद उमेशमुद्राविनिर्णयो नाम गतः समाप्तिम् २ संसारसिंधुं तरितुं सुखेन संचिन्त्यमानं सत
तं यतीन्द्रैः सुरावलीवंद्यपदारविंदं सदा मुकुंदं सुजनाभजध्वम् एकोनविंशतिर्मुद्रा विष्णुरुक्ता मनीषिभिः शंखचक्रगदापद्मवे
णुश्रीवत्सकौस्तुभा वनमालाज्ञानमुद्रा बिल्वाह्वयानथा गरुडाख्यापरामुद्रा विष्णोः संतोषवर्द्धिनी नारसिंही च वारा
ही हयग्रीवी धनुस्तथा बाणमुद्रा च परशुर्जगन्मोहिनिका परा काममुद्रेत्यमूषां तु कथ्यन्ते लक्षणानि हि मन्त्रदर्पणे शंख
र ध्यंगगदाद्या विष्णोरेकोनविंशतिमुद्राः वामांगुष्ठं धृत्वा दक्षिणमुष्ट्या प्रसारयेद्धृष्टाम् कृत्वा भान्तमुष्टि वामांगुल्यः प्रसा
रिताः श्लिष्टाः दक्षांगुष्ठस्पृष्टाः कार्याः स्याच्छंखमुद्रैषा १ चेदंगुष्ठकनिष्ठे लग्ने भुग्ने प्रसारिते कुर्यात् सम्मुखहस्तौ कृ
त्वा स्यादेषा चक्रमुद्रैषा २ हस्तौ मिथोभिवद्धौ कुर्यात् ग्रथितांगुली भूयः गदितैव गदामुद्रा संलग्नसुप्रसारिते मध्ये ३ ए
षा तु पद्ममुद्रा हस्तौ चेत्सम्मुखौ कृत्वा तलसंमिलितांगुष्ठावंगुल्यः सन्नतोन्नताः कार्याः ४ ओष्ठे लग्नोंगुष्ठो वामस्य क
निष्ठिकातस्य दक्षांगुष्ठपृष्ठे तस्य च सरला कनिष्ठिका कार्या शिष्टास्तिस्रो मतिमान् किंचित्संकोच्य चालयेद्देणुं दक्षां
गुष्ठपृष्ठन्त इति चाकारयुक्तः पूर्वस्यापि कश्चिदुक्तवान्नात्र छन्दोभंगः शिष्टास्तर्जनीमध्यमानामाः वेणुरितिवेणुमुद्रेत्यर्थः

मु·प्र· पृष्ठेपृष्ठं दत्त्वा साकं तर्जन्योः कनिष्ठया वध्वा मध्यानामे च मिथोप्यंगुष्ठेन तु निवध्नीयात् विप्रविरचनमस्या गुरुनाम्नेयं।
९ श्रीवत्समुद्रायाः ६ दक्षिणाकनिष्ठिकां चेद्नामिकापृष्ठसंलग्नां वामस्य कनिष्ठिकया वध्वाः नामां च तर्जन्या दक्ष०
स्यांगुष्ठाग्रौ मध्यांगुष्ठोपरासरलाः कौस्तुभमुद्रा कथिता शिखरविलग्नाश्च तस्तोपि वामस्येति त्रिषन्वितं दक्षसे
तिद्वयोरिति वोध्यं ७ कंठादिकपादांतं तर्जन्यंगुष्ठयोगेन वनमालामुद्रास्यात्करयोः स्रग्वच्च संस्पर्शात् ८ तर्जन्यौ
गुष्ठाग्रे मिलिते हृदये न्यसेद्विधिना वामे जानुनि वामं हस्तं ज्ञानाभिधा मुद्रा ९ वामांगुष्ठोर्द्धाग्रं दक्षांगुष्ठेन संगृह्य।।
शिष्ठाभिस्तु तदग्रं ताअपि वामांगुलीभिश्च वध्वा गाढं स्मारं स्मृत्वा संस्थापयेद्हृदये वेणुवनिर्मलवुद्धे गोप्यं विल्व
मुद्रास्यात् स्मारं कामवीजं १० हस्तौ विमुखौ कृत्वा तर्जन्यौ द्वे कनिष्ठिके ग्रथिते अंगुष्ठौ च श्लिष्टौ मध्यमानामे ज्ञं। तयापक्षौ
द्वौ चालयेच्च विधिना गारुडमुद्रा वुधैरुक्ता ११ जान्वंतरालहस्तौ भूसंलग्नौ विधाय मुद्रः कंपितआस्यं विवृत्तं चिवुकोष्ठौ
च समावृत्तौ कुर्यात् संलेलिहानकश्च जिह्वां मुद्रा नृसिंहाख्या अंगुष्ठाभ्याम यवा कनिष्ठिके द्वे समाक्रम्य करयोस्त्वधो राम ९
मुखीभिः सर्वाभिर्नरहरेर्मुद्रा १२ देवस्योपरि वामं कृत्वोत्तानं त्वधः करं नमयेत् वाराहीयं मुद्रा तां तस्मै दर्शयेन्मंत्री उर्द्धा
धोमुखहस्तौ दक्षिणावामौ क्रमेणैव अंगुल्यग्रे युक्तं वाराही वा स्मृता मुद्रा १३ वामेहस्ततले तावद्दक्षांगुल्यस्त्वधोमुखारोप्याः

तुरगग्रीवानासामुन्नम्याधोविकुंचयेन्मध्या १४ अंगुष्ठेनतु बध्वावामानामाकनिष्ठिके योज्य मध्यातर्जन्यग्रेवाम।
स्कंधे प्रदर्शयेच्चापं योज्येइतिमध्यमातर्जन्यग्रयोर्विश्लेषणं चापमितिधनुर्मुद्रेत्यर्थः १५ मुष्टिंबध्वादक्षहस्तेन वद्धां
मध्यातर्जन्यंतरालेनियोज्य दीर्घांकृत्वाकृष्यकर्णस्पर्शात्साच्छकेर्विश्लेषापिवाणाख्यमुद्रा शरमुद्रावाप्रोक्तार
क्षिणमुष्टेस्तुतर्जनीसरला१६ करयोस्तलेतलंचेत् तिर्यक्संयोज्यचांगुलीः प्रसृताः कुर्य्याच्चसंहतास्ताः संप्रोक्तापरशु
मुद्रेयम् उर्द्धांगुष्ठहितयंमुष्टिद्वितयमितिमोहनीजगता १८ कृत्वापुटितौहस्तौप्रसृतांगुलिकौचतर्जन्यौ मध्या
पृष्ठेऽंगुष्ठौमध्याक्रोडस्थितौकामः कामइतिकाममुद्रेत्यर्थः १९ तत्रांतरे० वामांगुष्ठंतुसंगृह्यदक्षिणेनतुमुष्टिना कृ
त्वोत्तानंततोमुष्टिमंगुष्ठंतुप्रसारयेत् वामांगुल्यःस्तथाश्लिष्टाः संयुक्तासुप्रसारिताः दक्षिणांगुष्ठसंस्पृष्टात्वेयेषाशंखमु
द्रिका १ हस्तौतुसंमुखौकृत्वासंभुग्नौसुप्रसारितौ कनिष्ठांगुष्ठकौलग्नौमुद्रेषाचक्रसंज्ञिका २ अन्योन्याभिमुखौह
स्तौकृत्वातुग्रथितांगुलीः अंगुष्ठौमध्यमेभूयः सुलग्नेसुप्रसारिते गदामुद्रेयमुदिताविश्लेषःसंतोषवर्द्धिनी ३ हस्तौतुसं
मुखौकृत्वासन्नतप्रोन्नतांगुलीःतलांतरमिलितांगुष्ठौकृत्वेषापद्ममुद्रिका ४ ओष्ठेवामकरांगुष्ठोलग्नस्तस्यकनि
ष्ठिका दक्षिणांगुष्ठसंयुक्तातत्कनिष्ठा प्रसारिता तर्जनीमध्यमानामाः किंचित्संकोच्यचालिताः वेणुमु

प्र॰ मु॰ द्राभवेत्प्रियामुग्रत्ना प्रेयसी हरेः ५ अन्योन्यपृष्ठकरयोर्मध्यमानामिकांगुली अंगुष्ठेन तु बध्नीयात् कनिष्ठामूलसंस्थिते तर्ज
१० न्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिका ६ अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका कनिष्ठयान्यया बध्वा तर्जन्यं दक्षया तया वामा
नामां च बध्नीयाद्दक्षिणांगुष्ठमूलके अंगुष्ठमध्यमे वामे संयोज्य सरलाः पराः चतस्रोप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका ७ स्पर्शेत्
कंठादिपादांतं तर्जन्यांगुष्ठयातया करद्वयेन मालावन्मुद्रेयं वनमालिका ८ तर्जन्यंगुष्ठकौ सक्तावग्रतो विन्यसेद्धृदि वामहस्तांबु
जं वामजानुमूर्द्धनि विन्यसेत् ज्ञानमुद्रा भवेदेषा रामचंद्रस्य प्रेयसी ९ अंगुष्ठं वाममुद्दंडितमितरकरांगुष्ठकेनाथ बध्वा तस्याग्रेपि
ड्यीतांगुलिभिरपि च वामहस्तांगुलीभिः बध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्मारबीजं बिल्वाख्या मुद्रिकेषा स्फुटमिह गदि
प ता गौतमीयाविधिज्ञैः १० इतरकरांगुष्ठेन दक्षिणहस्तांगुष्ठेन तस्य दक्षिणहस्तांगुष्ठस्य अंगुलीभिर्दक्षिणहस्तांगुलिभिः ताद
क्षिणहस्तांगुलीः मारबीजं कामबीजं हस्तौ विमुखौ कृत्वाग्रथयित्वा कनिष्ठिके मिथस्तर्जनिके श्लिष्टे श्लिष्टावंगुष्ठकौ तथा मध्यमाना
मिके तु द्वौ पक्षाविव विचालयेत् एषा गरुडमुद्रा स्याद्विष्णोः संतोषवर्द्धिनी ११ जानुमध्ये करौ कृत्वा चिबुकोष्ठौ १०
समावृतौ हस्तौ तु भूमिसंलग्नौ कंपमानः पुनः पुनः संमुखो निवृतकं कुर्याल्लेलिहानं तु जिह्विकाम् नारसिंही भवेदेषा मुद्रा नत्यतिवर्द्धिनी १२

अंगुष्ठाभ्यांतुकरयोस्तथाकम्पकनिष्ठिके अधोमुखीभिः सर्वाभिर्मुद्रेयंनृहरेर्मता १३ देवोपरिकरंवामंकृत्वोत्तानमधःसु।
धीः नमयेदितिसंप्रोक्तामुद्रावाराहसंज्ञिका प्रकारांतरम् दक्षहस्तंचोर्द्धमुखंवामहस्तमधोमुखम् अंगुल्यग्रंतुसंयु
क्तंमुद्रावाराहसंज्ञिका १४ वामहस्ततलेदक्षांगुलीस्तास्त्वधोमुखीः संरोप्यमध्यमांतासांनम्याधोतिकुंचयेत् हयग्रीवप्रिया वि
चैषानन्तूर्तेरनुकारिणी १४ वामस्यमध्यमाग्रंतुतर्जन्यग्रेणयोजयेत् अनामिकांकनिष्ठांचतस्यांगुष्ठेनपीडयेत् दर्शये।
द्वामकेस्कंधेधनुर्मुद्रेयमीरिता १५ दक्षमुष्टेस्तुतर्जन्यादीर्घयावाणमुद्रिका १६ यद्वा ज्ञानार्णवे यथाहस्तगतंचापंत।
थाहस्तंकुरुप्रिये चापमुद्रेयमाख्याता वामहस्तव्यवस्थिता यथाहस्तगतावाणास्तथाहस्तंकुरुप्रिये वाणमुद्रेयमाख्या
तारिपुवर्गनिकृन्तनी १६ तलेतलंतुकरयोस्तिर्यक्संयोज्यचांगुलीः संहताः प्रसृताः कुर्यान्मुद्रापरशुसंज्ञिका १७ उ
च्छ्रितांगुष्ठमुष्टीद्धेमुद्रा त्रैलोक्यमोहिनी १८ हस्तौतुसंपुटौकृत्वाप्रसृतांगुलिकौतथा तर्जन्यौमध्यमापृष्ठे अंगुष्ठौमध्य
माश्रितौ काममुद्रेयमुदितासर्वदेवप्रियंकरी १९ एतानिवचनानितंत्रसारकारधृतानि श्रीगोपालार्चनेवेणुर्नृहरे
र्नारसिंहिका वाराहस्यचपूजायां वाराहाख्यांप्रयोजयेत् हयग्रीवार्चनेमुद्रांहायग्रीवींप्रदर्शयेत् रामार्चनेधनुर्वाणा
मुद्रापरशुसंज्ञिका जगन्मोहनसंज्ञाचपरशुरामस्यपूजने द्विजातिनारामकिशोरनाम्नामुद्राप्रकाशोरचितेप्रयत्नात् अयं

मु॰प्र॰ परिच्छेदउपेन्द्रमुद्राविनिर्णयोनामगतस्तृतीयः ३ धीराभजतद्दिनेशंकरुणासिन्धुंत्रिलोकीशं। भजनाद्यस्याघौघाः
११ नश्यन्तुदयात्तमासीव सूर्यस्यैकैवपञ्चानलसर्गानुकीर्तितम् इतिसूर्यस्य सन्तानम नगरोशंगौर्वाणाः यंनमंतिश
क्राद्याः विघ्नाविलयंयस्यस्मरणेनापिव्रजन्त्याशु सममुद्रागणेशस्यदंतपाशांकुशाह्वयाः विघ्नपरशुसंज्ञेचतथा
लड्डुकसंज्ञिका बीजपूराह्वयाचासामुच्यंतेलक्षणानिच॥मंत्रदर्पणे॥दक्षोत्तानामुष्टिः प्रोर्ध्वीयामध्यमासरला।
कार्यागणेशमुद्रारदमुद्रेयंसमाख्याता १ मुष्टिद्वितयंकृत्वासंयोज्यचवामतर्जन्या॥ दक्षिणातर्जनिकांचेदंगुष्ठा
ग्रेतदग्रयोः पाशः चेद्यदिअंगुष्ठाग्रद्वयंतर्जन्यग्रयोः क्षिपेत्पाशः पाशमुद्रेत्यर्थः २ कृत्वासरलांमध्यांमध्यपर्व।
णातुतर्जनीयोज्या आकुंचयेच्चकिंचित्स्यादंकुशमुद्रिकारम्या ३ रदमुद्राधोवक्त्राविघ्नाख्यासैवसंप्रोक्ता ४ परशु
मुद्राकथितालड्डुकदाडिममुद्रेनादृश्यहस्तंप्रकुर्वीत तंत्रसारे उत्तानोर्द्ध्वमुखीमध्यासरलाबद्धमुष्टिका दंतमुद्रासमा
ख्याताः आगम विशारदैः १ वाममुष्टेस्तुतर्जन्यादक्षमुष्टेस्तुतर्जनीम् संयोज्यांगुष्ठकाग्राभ्यांतर्जन्यग्रेस्वकेक्षिपेत् राम
एषापाशाह्वयामुद्राविद्वद्भिः परिकीर्तिता२ ऋज्वींचमध्यमांकृत्वातर्जनीमध्यपर्वणि॥ संयोज्याकुंचयेत्किंचिन्मुद्रैषां ११
कुशसंज्ञिका ३ तर्जनीमध्यमानामाकनिष्ठांगुष्ठमुष्टिका अधोमुखीदीर्घरूपामध्यमाविघ्नमुद्रिका ४ परशुमुद्रानिग

दिताप्रसिद्धालड्डमुद्रिका बीजपूराहृयामुद्राप्रसिद्धत्वादुपेक्षिता द्विजातिनारामकिशोरनाम्नामुद्राप्रकाशेरचितेप्र।
यत्नात् अथैपरिकेदइमास्यमुद्राविनिर्णीयानामगतस्वतुर्थे: ४ वांछतिसुरपराप्रपूज्यपरायाः करुणालोकंगिरि
वरजायाः रामकिशोरोभीतोदीनस्वरणेपतितोभजनविहीनः पाशांकुशवराभीतिखड्गचर्मधनुःशराः मौशलीचनया
दौर्गीमहायोनिरिमाःप्रियाः शक्तेमुद्राअथैतासांमुच्यतेलक्षणानिच पाशांकुशवराभीतिधनुर्बाणाःसमीरिताः खड्गमुद्रा
लक्षणंमन्त्रदर्पणे वध्वाखलसानामेदक्षांगुष्ठेनयदिकुर्यात् स्यादसिमुद्रासरलेसंस्पृष्टेतर्जनीमध्ये॥ तंत्रांतरेपि॥कनि
निष्ठानामिकेवध्वाअंगुष्ठेनैवदक्षतः शेषांगुलीतुप्रसृतेसंसृष्टेखड्गमुद्रिका अथचर्ममुद्रालक्षणंमंत्रदर्पणे वामहस्तं
तद्वत्तिर्यककृत्वाप्रसारयेत्पश्चात्आकुंचितांगुलिंचकुर्यादितिचर्ममुद्रास्यात्तंत्रांतरेपि वामहस्तंतथातिर्यककृत्वाचैवप्रसार्य
च आकुंचितांगुलिंकुर्याचर्ममुद्रेयमीरिता मुषलमुद्रादुर्गामुद्रायाश्चलक्षणं यथामंत्रदर्पणे उपर्यधोदक्षिणावाममुष्टि
कुर्यात्तदासानुमुशलाख्यमुद्रा शिरःस्थिताचेदियमेवदौर्गीदुर्गाप्रियाविघ्नविनाशिकाद्या आद्यामुशलमुद्रा तंत्रसारे० मुष्टिं
कृत्वातुहस्ताभ्यांवामस्योपरिदक्षिणं कुर्यान्मुशलमुद्रेयंसर्वविघ्नविनाशिनी मुष्टिंकृत्वाकराभ्यांचवामस्योपरिदक्षिणं
कृत्वाशिरसिसंयोज्यदौर्गीमुद्रेयमीरिता अथमहायोनिमुद्रालक्षणम् मंत्रदर्पणे कृत्वाहस्तौसंमुखौतर्जनीभ्यांवध्वाना

मु·प्र· ममध्यमापृष्ठसंस्थे दीर्घेमध्येक्रोडसंस्थकनिष्ठयोनिः प्रोक्तांगुष्ठकौचैतदग्रे दीर्घेमध्यमेकनिष्ठेच क्रोडसंस्थेमध्य
१२ माक्रोडसंस्थे तदग्रेकनिष्ठयोरग्र द्वये मूलेंगुष्ठौचतयोर्भवतिहियोनिर्महायोनिः तस्यावक्रेमध्येसांगुष्ठभूतिनीसास्या
त् तयोःकनिष्ठयोः तदायोनिरेवमहायोनिःस्यात् तस्यायोन्यावक्रेकुटिले सांगुष्ठेअंगुष्ठयुक्ते तंत्रसारे तर्जन्यनामि
कमध्याकनिष्ठाःक्रमयोगतः करयोर्योजयित्वाचकनिष्ठामूलदेशतः अंगुष्ठाग्रेतुनिक्षिप्यमहायोनिःप्रकीर्तिता
करयोर्मिथस्तर्जनीभ्यामनामिकेयोज्ये मध्यमामध्यायोज्या मध्यम्याक्रोडसंस्थयोस्तादृशकनिष्ठयोर्मूलेयद्यंगुष्ठाग्र
द्वयंनिक्षिप्यतेतदामहायोनिर्भवतीत्यर्थः प्रकारांतरम् मंत्रदर्पणे कृत्वाकरौचपुटितौस्वांगुष्ठाग्रंकनीयसोर्मूले योजय
परयोनिः स्यान्मुद्राकालीप्रियंकरीख्याता तंत्रांतरेपि करौचसंपुटौकृत्वाकनिष्ठामूलदेशतः अंगुष्ठाग्रेयोजयित्वा
परयोनिरितीरिता ॥ कालीप्रियामुंडमुद्रातस्यालक्षणमुच्यते मंत्रदर्पणे मुष्टिंतुवामपार्श्वः कुर्याद्दक्षं तदंगुष्ठम्
दक्षस्यमध्यमाग्रेसंलग्नतयातर्जन्या अंगुष्ठाग्रंयोज्यदक्षिणपाणिंचयोजयेन्मुष्टौ दर्शयेद्दक्षिणभागेमस्तकमुद्रास्मृता
कालाः तंत्रसारे अंतरांगुष्ठमुष्टिंतुकृत्वावामकरस्यच मध्यमाग्रेदक्षिणस्यतयालग्नप्रयत्नतः मध्यमेनाथतर्जन्यामंगुष्ठा राम
ग्रेणायोजयेत् दक्षिणयोजयेत्पाणिंवाममुष्टौतुसाधकः ॥ दर्शयेद्दक्षिणेभागेमुंडमुद्रेयमुच्यते ताराप्रियाः पंचमुद्रायोन्या १२

स्याभूतिनी तथा वीजाख्या च तथा दैत्यधूमिनी च तथापरा लेलिहानेति चासां तु कथ्यंते लक्षणान्यथ लक्षणं योनिभूति
न्योः कथितं कथ्यते ऽपि च वालाविलासतंत्रे मिथस्यांगुलीः संधिषु स्थापयित्वा अनामे च वध्वा ततस्तर्जनीभ्यां कनिष्ठे
सद्वृह्य समाग्रे ऽन्तराले न्यसेन्मध्यमे दंडरूपे च योनिः समाप्ये ऽन्तराले द्वृति संधिश्लिष्टां दृसः योनिर्योनिमुद्रा स्यादिति शेषः तत्रांतरे
वध्वा तु योनिमुद्रां वै मध्यमे कुटिले कुरु अंगुष्ठेन तदग्रे तु मुद्रेयं भूतिनी मता वीजमुद्रा तु वक्तव्या कथ्यते दैत्यधूमिनी मंत्रदर्पणे
संयोज्याथ कनिष्ठे द्वे ऽन्योन्यं त्वनामायाः अंगुष्ठाभ्यां वध्वा तौ वन्धीयात्तु मध्याभ्यां क्षिप्त्वानामे वक्रे वद्ध मूले यत्तर्जन्यौ
सरलेति मिलिते कुर्यात्स्याद्दानवधूमिनी मुद्रा ताराकल्पेपि अनामायाः पृष्ठदेशे कनिष्ठे योजयेन्मिथः अंगुष्ठाभ्यां ते निरुध्य तौ
मध्याभ्यां निवंधयेत् अनामे कुटिले कृत्वा क्षिपेत्स्वांगुष्ठमूलयोः तर्जन्यौ सरले युक्ते मुद्रा दानवधूमिनी ते कनिष्ठे तावंगुष्ठौ
अन्यत्रापि परिवर्त्य करौ स्पष्टौ कनिष्ठांगुष्ठमध्यमाः अनामा युगलं चाधस्तर्जनीयुगलं पृथक् अन्योन्यं निविडं वध्वा स्वांगु
ष्ठाभिमुखास्तथा स्याद्दैत्यधूमिकेत्याख्या मुद्रा वंधविमुक्तिदा कनिष्ठेति कनिष्ठयोरुपर्यंगुष्ठौ तयोरुपरि मध्यमे एतासां स
र्वासामंगुलीनामधो ऽनामायुगलं स्वांगुष्ठाभिमुखाविति कनिष्ठानामिकामध्या इति शेषः अथ लेलिहानालक्षणम् मंत्रद
र्पणे रसनां संचाल्याऽधो वदनं विस्तारितं कृत्वा पार्श्वद्वयगतमुष्टिर्मुद्रैषा लेलिहानाख्या अन्यत्रापि वक्त्रं विस्तारितं कृत्वाप

मु·प्र· योजिह्वां च चालयेत् पार्श्वस्थं मुष्टियुगलं लेलिहानेति कीर्तिता इति॰ योनिर्माया धरः सेंदुर्वधूः कूर्चं क्रमाद्धिदुः बीजानि
१३ चित्वरं मंत्री मुद्रावंधनमाचरेत योनिरेकारः माया ह्रीं अधरः ऐकारः सेन्दुः सानुस्वारः वधूः स्त्रीं कारः कूर्चं हूं कारः तथा च एं ह्रीं ऐं
हूं इत्येतानि पंच क्रमेण योन्यादीनां पंचानां मुद्राणां बीजानि श्रीमत्त्रिपुरसुंदर्याः कथ्यंते नवमुद्रिकाः सर्वसंक्षोभिणी मुद्रा
सर्वविद्राविणी तथा सर्वाकर्षणिका चैव सर्ववश्यकरी ततः सर्वोन्मादनिका मुद्रा षष्ठी ज्ञेया महांकुशा खेचरी बीजमुद्रा
च नवमी योनिरूपिणी ज्ञानार्णवे द्वादशपटले क्षोभणाद्रावणाकर्षवश्योन्मादमहांकुशाः खेचरी बीजयोन्याख्या नवमुद्रास्त्व
नुक्रमात् बीजानि वक्ष्ये मुद्राणां क्रमतः परमेश्वरी पंचवाणाः पंचमुद्राः करोमात्मकमक्षरम् आद्यं तु रुद्रभैरव्या बीजं सदा
शिवं ततः केवलं वाग्भवं देवी क्रमेण च चतुष्टयम् चतुर्मुद्रासु बीजानि नवमुद्रा नवक्रमात् पंचवाणैरिति द्रां द्रीं क्लीं ब्लूं सः इत्ये
तैः पंचभिर्वाणैरित्यर्थः तथा च तत्रैव द्वितीयपटले यांतद्वयं समालिख्य वन्हिसंस्थं क्रमेण हि मुखवृत्तेन नेत्रेण वामेन परिमं
डितम् वाणद्वयमिदं प्रोक्तं मादनं भूमिसंस्थितं चतुर्थस्वरविन्द्वाढ्यं नादरूपं वरानने फांतं शक्रसमायुक्तं वामकर्णविभूषि
तम् विन्दुनादसमायुक्तं सर्गवांश्चंद्रमा भवेत् पंचवाणान्महेशानि नामतः शृणु पार्वति॥ क्षोभनोद्रावणो देवी तथाकर्ष राम
णसंज्ञकः वश्योन्मादौ क्रमेणैव नामानि परमेश्वरि इति॰ पंचमुद्रा इति दर्शयेदिति शेषः करोन्यात्मकमिति क्रों इत्या- १३

कारमंकुशवीजम् महांकुशाख्यायाः षष्टामुद्रायावीजम् आख्यांत्विति रुद्रभैरवीमंत्रस्याद्यंवीजम् हसखफ्रें इत्येतत्तत्स्व
पम् खेचराख्यायाः सप्तमामुद्रायावीजम् रुद्रभैरवीमंत्रस्तु ज्ञानार्णवेसप्तमपटले ऽनुसंधेयः सदाशिववीजं प्रेतवीजंह्सौः
इत्यष्टम्यावीजाख्यायामुद्रायावीजं केवलंवाग्भवंवैऐं इतिनवम्यायोनिमुद्रायावीजम् एतानिनववीजानिक्रमेणोच्चारयन्
नवमुद्राः प्रदर्शयेदितिसमुदायार्थः अथैतासांलक्षणानिनिगद्यंतेक्रमेणहि वामकेश्वरतंत्रेयान्याश्चचक्षेमहेश्वरः मध्य
मामध्यगेकृत्वाकनिष्ठेऽंगुष्ठरोधिते तर्जन्योदंडवत्कृत्वामध्यमोपर्यनामिके एषाचप्रथमामुद्रासर्वसंक्षोभकारिणीकनि
ष्ठेंऽगुष्ठेतिसंधिष्ठान्ताद्रसः १ एतस्याएवमुद्रायामध्यमेसरलेयदा क्रियतेपरमेशानिसर्वविद्राविणीतदा २ मध्यमातर्जनी
भ्यांचकनिष्ठानामिकेसमे अंकुशाकाररूपाभ्यांमध्यमेपरमेश्वरि ३ अंगुष्ठंतुनियुंजीतकनिष्ठानामिकोपरि इयमाकर्षि
णीमुद्रात्रैलोक्याकर्षणक्षमा ४ अंकुशाकाररूपाभ्यांमध्यमातर्जनीभ्यांविशिष्टा मध्यमेतादृश मध्यमातर्जन्योर्मध्यवर्ति
न्योकनिष्ठानामिकेसमे पूर्वमुद्रातुल्ये ४ पुटाकारौकरौकृत्वातर्जन्यावंकुशाकृती परिवर्तक्रमेणैवमध्यमेतदधोगते क्रमेण
देवितेनैवकनिष्ठानामिकादयः संयोज्यनिविडाःसर्वाअंगुष्ठावयवेशतःमुद्रेयंपरमेशानीसर्ववशंकरीमताकनिष्ठानामिकादयइतिकनिष्ठानामि
कापदंदक्षहस्तकनिष्ठानामिकापरम् आदिपदेनवामहस्तकनिष्ठानामिकापरिग्रहः अंगुष्ठावयवेशइति अंकुशाकार

यास्तयोस्तर्जन्योरग्रदेशेंगुष्ठौ योजयेदिति शेषः ४ सन्मुखौ तु करौ कृत्वा मध्यमामूमध्यमेत्यजे अनामिकानुसरले तद्वहिस्तर्जनीद्वयम् दंडा
कारौ ततोंगुष्ठौ मध्यमानखदेशगौ मुद्रैषोन्मादिनीनामत्कैदिनी सर्वयोषिताम् ५ अंत्यजे कनिष्ठे दक्षिणहस्तकनिष्ठां वामह
स्तमध्यमया वध्वा वामहस्तकनिष्ठां दक्षिणहस्तमध्यमया वध्वा मध्यमयोर्नखदेशयोरंगुष्ठौ निःक्षिपेदित्यर्थः अस्यास्त्वनामि
काग्रमधः कृत्वांकुशाकृती तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् इयं महांकुशा मुद्रा सर्वकामार्थसाधिनी ६ सव्यं दक्षि
णदेशे तु सव्यदेशे तु दक्षिणम् वाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्य च कनिष्ठानामिके देवि युक्ता तेन क्रमेण तु तर्जनीभ्यां समाक्रांते पूर्वा
हूमपि मध्यमे अंगुष्ठौ च महेशानि सरलावपि कारयेत् इयं सा खेचरी मुद्रा पार्थिवस्थानयोजिता पार्थिवस्थानं ललाटम् ननु मूलाधार
मसंभवादिति मंत्रदर्पणकारः ७ परिवर्त्य करौ स्पष्टावर्द्धचंद्राकृती प्रिये तर्जन्यंगुष्ठयुगलं युगपत्कारयेत्ततः अधः कनिष्ठावष्टब्धे मध्यमे वि
नियोजयेत् तथैव कुटिले योज्ये सर्वाधस्तादनामिके बीजमुद्रेयमचिरात्सर्वसिद्धिप्रवर्द्धिनी ८ मध्यमे कुटिले कृत्वा तर्जन्युपरि संस्थिते अना
मिके मध्यगते तथैव हि कनिष्ठिके सर्वा एकत्र संयोज्या अंगुष्ठपरिपीडिताः एषा तु प्रथमा मुद्रा योनिमुद्रेति संज्ञिता ९ एतां मुद्रां महेशानि त्रि
पुरायां मयोदिताः पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ज्ञानार्णवेपि तंत्रेपि द्वादशपटले विपरीतौ करौ कृत्वा मध्यमे मध्यगे कुरु अंगुष्ठाभ्यां १४

न्कुर्यान्मध्यमास्य ह्यनामिके सर्वसंक्षोभणीमुद्रा त्रैलोक्यक्षोभकारिणी संपीड्य मिथः संयोगं कृत्वा १ मध्यमे तर्जनीयुक्ते
सरले स्यात्सदा भवेत् सर्वविद्राविणी मुद्रा द्रावयेद्धरलोचने २। मध्यमे तर्जनीयुक्ते इत्यत्र मध्यमातर्जनीयुग्मे इति पुस्तकान्त
रे पाठः सरले स्यादिति संधिश्छान्दसः मध्यमं तर्जनीयुग्मं वक्रं कुर्यात्सुलोचने एतस्या एव मुद्राया सदाकर्षणकारिणी ३ वि
परीतौ करौ कृत्वा चांगुलीः सन्मुखाः स्पृजेत् परिवर्तनमार्गेण क्रमेण निविडास्ततः अंगुष्ठयोरग्रदेशे तर्जन्यावंकुशाकृती सर्वा
एकत्र संयोज्य सर्ववश्यकरी भवेत् ४ पुटांजलिकरौ कृत्वा मध्यमागर्भसंस्थिते परस्परं कनिष्ठे तु तर्जन्यग्रगते ततः अना
मिके तु सरले मध्यमानखदेशगे अंगुष्ठौ परमेशानि सर्वोन्मादनकारिणी परस्परमिति संयुक्ते इति शेषः ५ एतस्या एव
मुद्राया अनामातर्जनीक्रमात् अंकुशाकाररूपा तु मुद्रेयं तु महांकुशा ६ वामं भुजे दक्षिणं वामदेशतः निवेश्य
योजयेत्पश्चात्परिवर्तक्रमेण हि कनिष्ठानामिकायुग्मे तर्जनीभ्यां निरोधयेत् मध्यमे सरले योज्य योनिवत्सरलौ ततः ॥अं
गुष्ठौ खेचरी मुद्रा पार्थिवस्थानयोजिता प्रियेयं सर्वदेवानां खेचरत्वप्रदायिनी ७ परिवर्त्यांजलिं बध्वा कनिष्ठा
ग्रगते ततः मध्यमे स्थापयेद्देवि कनिष्ठे धारयेत्ततः अनामिकाभ्यां सुदृढं मध्यमे तर्जनीयुगम् अंगुष्ठाभ्यां समायोज्य
अर्द्धचंद्राकृती प्रिये बीजमुद्रेयमाख्याता सर्वानंदकरी प्रिये ८ परिवर्त्य करौ सम्यक् तर्जनी वदने समे मध्यमे कुरुतन्म

मु॰प्र ध्येयोजयेत्तदनंतरं अन्योन्यानामिकेदेविकनिष्ठेचतथाविधे अंगुष्ठाभ्यांयोजिताभ्यांयोन्याकारंतुकारयेत् योनिमुद्रे
१५ यमाख्यातापरात्रैलोक्यमातृका तर्जनीवदने तर्जनीसन्मुखेमध्यमेकुरु तदनंतरम् तन्मध्येतर्जनीमध्यमामध्ये अ
न्योन्यानामिकेयोजयेत् दक्षिणहस्ततर्जनीमध्यमयोर्मध्येवामहस्तानामिकांयोजयेत् कनिष्ठेचतथाविधेतादृशेद
क्षिणहस्ततर्जनी मध्यमयोर्मध्येवामहस्तकनिष्ठांयोजयेत् वामहस्ततर्जनीमध्यमयोर्मध्येदक्षिणांयथा संक्षोभद्राव
णाकर्षवश्योन्मादमहांकुशाः खेचरीबीजयोन्याख्यानवमुद्राः श्रियःप्रियाः श्रियः श्रीविद्यायाःप्रियः संधिषुसंयोज्य
करशाखाकनिष्ठिके अंगुष्ठाभ्यांततोबध्वातर्जन्योसरलेयुते मध्यमानामिकेकुर्यात्त्वांगुष्ठमूलसंस्थिते सर्वसंक्षोभि
णीमुद्राविश्वसंक्षोभकारिणी करशाखाअंगुल्यःअंगुल्यः करशाखास्युरित्यमरः १ एतस्याएवमुद्रायाः मध्यमेसरले
यदि सर्वविद्राविणीमुद्राद्रावयेद्भुवनत्रयम् २ स्यात्सर्वाकर्षिणीमुद्राकनिष्ठेचेदनामतः ३ मध्यमाभ्यांनिबन्धीयात्सर्वव
श्यकरीभवेत् ४ एतस्यामुद्रायाश्चेद्यदिअनामतोऽनामिकाभ्यांकनिष्ठेनिबध्नीयात्तदासर्वाकर्षिणीस्यात् यद्दिमध्यमा
भ्यांकनिष्ठेनिबध्नीयात्तदासर्ववश्यकरीस्यादित्यर्थःइतिमन्त्रदर्पणकारः ४ इयमेवोन्मादिनीस्यादनामांगुष्ठयोगतः राम
५ तेऽगुष्ठाभ्यामंकुशोचेदियंमुद्रामहांकुशाः ६ इयंसर्ववश्यकरीमुद्रैवोन्मादिनी मुद्रास्याद्यद्यंगुष्ठमूलस्थिते अनामे १५

उत्थाप्यांगुष्ठाभ्यांयोज्यते तेअनामेचेद्वादिअंगुष्ठाभ्यामंगुष्ठद्वयद्वारेणांकुशौ अंकुशाकारेवक्रैःक्रियेते तदाइयमुन्मादिनीमु
द्रैवमहांकुशामुद्रास्यादित्यर्थः तेअंगुष्ठाभ्यामितिसंधिश्छांदसः योनिमुद्रांवक्ष्यमाणां ७ मिथोनापृष्ठदेशेसंयोज्येमध्य
मेपुनः वध्वातेतुकनिष्ठाभ्यांतर्जन्योःसरलेस्तते तत्त्वमुद्राद्वयंकुर्यादिद्विजमुद्रासमीरिता ८ दक्षिणहस्तनामापृष्ठदेशेवामहस्त
मध्यमांवामहस्तानामापृष्ठदेशेदक्षिणहस्तमध्यमांसंयोज्यते मध्यमकनिष्ठाभ्यांवध्वा अथ दक्षिणहस्तमध्यमांवाम
हस्तकनिष्ठयावामहस्तमध्यमांचदक्षिणहस्तकनिष्ठयावध्वा तर्जनीद्वयंसरलंमिथस्संयुक्तं चकृत्वा तत्त्वमुद्राद्वयंकुर्या
दनामाद्वयमंगुष्ठद्वयेनयोजयेदित्यर्थः ८ मिथश्चांगुलीःसंधिश्छस्थापयित्वा अनामेचवध्वा ततस्तर्जनीभ्याम् कनिष्ठे
सवक्रेसमाग्रेऽन्तरालेन्यसेन्मध्यमेदंडरूपेचयोनिः समाग्रेऽन्तरालइतिसंधिव्यवस्थाकैव ९ मंत्रदर्पणे० पाशांकुशवरा
भीतिपुस्तकज्ञानमुद्रिकाः योनिंचवीजमुद्रांचभुवनेशीम्प्रदर्शयेत् कामेनमुद्रांवध्वातुमूलेनैवम्प्रदर्शयेच कूर्चेनैवपरित्य
ज्यवहिःपूजनमाचरेत् तत्रैवमुष्टिः स्वाभिमुखीचेद्वामस्यचपुस्तिकामुद्रा अन्यत्रापि वाममुष्टिः स्वाभिमुखीकार्यापुस्तक
मुद्रेति लक्ष्मीमुद्राप्रियालक्ष्यास्तस्यालक्षणमुच्यते तंत्रसारे चक्रमुद्रांतयावध्वामध्यमेद्वेप्रसार्यच कनिष्ठिकेतथानी
यतदग्रे पृष्ठेक्षिपेत्लक्ष्मीमुद्रापराह्येषासर्वसंपत्प्रदायिनी परेत्वत्रस्मृतेतिक्वचित्पाठः अक्षमालातयावीणा।

मु०प्र० व्याख्यापुस्तकमुद्रिका सरस्वत्याः प्रियापरा तामुद्राः प्रोक्ता मनीषिभिः अथैतासां लक्षणानि निगद्यन्ते क्रमेणादि मन्त्रदर्पणे किं
१६ चिद्वक्ता अपराः कृतेन्यास्तर्जनी सरलाः मध्यामध्येऽङ्गुष्ठं दक्षस्य च मालिकामुद्रा १ वीणावादनसदृशौ हस्तौ कृत्वैव चालयेत् श्री
विम् वीणामुद्रा वाराण्याः प्रियंकरी समाख्याता २ दक्षिणकरमुत्तानं कृत्वा सरलाः कनिष्ठाद्याः तर्जन्यङ्गुष्ठाग्रे कथिता व्या
ख्यानमुद्रैषा ३ पुस्तकमुद्रालक्षणमुक्तं तन्त्रान्तरे प्रकुर्याद्दक्षिणं हस्तं मालयाजपवत्प्रिये मुद्रामालाभिधा प्रोक्ता वाला
वाग्व्यापारतिप्रिया १ तंत्रसारे वीणावादनवद्धस्तौ कृत्वा संचालयेच्छिरः वीणामुद्रे यमाख्याता सरस्वत्याभयंकरी द
क्षिणांगुष्ठतर्जन्यावग्रलग्नपरांगुलीः प्रसार्य संहतास्ता ना एषा व्याख्यानमुद्रिका श्रीरामस्य सरस्वत्या अत्यन्तप्रेयसी म
ता रामकिशोरविरचिते ग्रन्थे मुद्राप्रकाशाख्ये गतवान्पचमएष संपूर्णत्वं परिच्छेदः ५ शक्तिमुद्राविनिर्णयो नाम तंत्र
सारे० मणिबंधस्थितौ कृत्वा प्रसृतांगुलिकौ करौ कनिष्ठांगुष्ठयुगले मिलित्वा ततः प्रसारयेत् सप्तजिह्वाख्यमुद्रेयं वैश्वानर
प्रियंकरी अथ होममुद्रा षट्कर्मदीपिकायां नदेवाः प्रतिगृह्णन्ति मुद्राहीनां यथाकृतिम् मुद्रयैव तु होतव्यं मुद्राहीनेन होष्य०
ति मुद्राहीनं तु यो मोहाद्धोममिच्छति मन्दधीः यजमानं स चात्मानं पातयेत्तेन निश्चितं तेन होमे न तिस्रो मुद्राः स्मृता होमे मृगीत्र
सी च सूकरी सूकरी करसंकोचो हंसी मुक्तकनिष्ठिका मृगी कनिष्ठतर्जन्यो होममुद्रेयमीरिता कनिष्ठातर्जन्योर्यदि मुक्ते

इति शेषः अभिचारिककार्येषु सूकरी परिकीर्त्तिता एतेनान्यत्र मृगी हंसी वेति लभ्यते तन्त्रसारे॰ तर्जन्यंगुष्ठयोगाद्धि शान्त्यर्थे
जुहुयान्नरः दाहज्वराभिचाराणामनामांगुष्ठमुद्रया विद्वेषणोच्चाटने च मारणे च प्रशस्यते प्रदेशिनीमध्यमाभ्यां वाधोपश
मनं भवेत् वपुर्मेधा तथा कांतिर्नीतिपुष्ट्यादिकं तथा आकर्षणानि सर्वाणि दूराद्दनुगतानि च ॥ तर्जन्यनामिकायोगात्स्य
एवं भवंति हि मोहनं वश्यकामं च श्रीतिसंवर्द्धनं तथा प्रदेशिनीकनिष्ठाभ्यां सर्वमेतत्प्रसिध्यति मोहनाकर्षणं चैव क्षोभणो
च्चाटनं तथा कनिष्ठामध्यमांगुष्ठयोगेन नतु लीलया ॥ विधियुक्तेन होमेन तथा दृष्ट्वानुयोगतः सर्वे मन्त्राः प्रसिध्यंति मुद्राम
त्रयोगतस्त्विति प्रार्थनायां तु विशेया मुद्रा प्रार्थननामिका लक्षणं यथा तन्त्रसारे प्रसृतांगुलिकौ हस्तौ मिथः श्लिष्टौ च
सन्मुखौ कुर्यात्स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका विसर्जनविधौ ज्ञेया मुद्रा संहारसंज्ञिका उच्यते लक्षणं तस्याः यदुक्तं पूर्व
सूरिभिः अधोमुखे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्तकम् क्षिप्त्वांगुलिरंगुलीभिः संग्रथ्य परिवर्त्तयेत् एषा संहारमुद्रा स्याद्विस
र्जनविधौ स्मृता शारदायाम् परा मुद्राः क्रमेणैता ज्ञेयाः पद्मपाशगदाह्वयाः मुशलाशनिखड्गाख्याः शांतिकादिषु कर्मसु त
त्राशनिमुद्रालक्षणं मंत्रदर्पणे एषाऽशनिमुद्रा चेदंगुष्ठाग्रे कनिष्ठिकायोजना अपरास्तिस्रः सरलास्त्रिकोणरूपा भवन्ते
व अन्यत्रापि॰ त्रिकोणाशनिमुद्रा स्यात्कनिष्ठांगुष्ठयोगतः इति तन्त्रसारे दक्षिणानिबिडामुष्टिर्नासिकार्पिततर्जनी मुद्रा

विस्मयसंज्ञास्याद्विस्मयावेशकारिणी मुष्टिरूर्ध्वीकृतांगुष्ठादक्षिणानादमुद्रिका तर्जन्यंगुष्ठसंयोगादग्नतोबिन्दुमुद्रिका॥ इतिरामकिशोरविरचितेग्रंथेमुद्राप्रकाशसंज्ञके गतवानेषचषष्ठः सम्पूर्णत्वम्परिच्छेदः ६ योजतेसुकृतीधरासुरवरात्धीरोत्तमाद्राघवा तस्माद्रामकिशोरइश्वरसमाद्योरुद्रनारायणात् जातोयुग्मशरस्थिराधरधरामाने शकाब्देगते तेनासौत्रिपुरारिराजनगरेमुद्राप्रकाशःकृतः १॥ इति श्रीरामकिशोरशर्मविरचितमुद्राप्रकाशःसमाप्तः॥ संवत् १९४१ शाके १८०६ पौष कृष्ण ५ चंद्रवासरे॥ शुभंभूयात्॥ ॥ मणिबंधयुतौकृत्वाप्रसृतांगुलिकौकरौ कनिष्ठांगुष्ठयुगलेमिलित्वांतःप्रसारिते ज्वालिनीनाममुद्रेयंवैश्वानरप्रियंकरी १॥ समाप्तश्चासौग्रंथः॥ श्रीरस्तुशुभं

श्री॥अथमुद्रानाम		॥ सूचीपत्र°	९ कूर्ममुद्रा°	१४ स्थापनीमुद्रा°	१९ अवगुंठनी°	२४ गंधमुद्रा°	२९ प्राणमुद्रा°
१	अंकुशमुद्रा°	५ कालकर्णी°	१० त्रिखंडामुद्रा°	१५ सन्निधापनी°	२० अमृतीकरणी	२५ पुष्पमुद्रा°	३० आपानमुद्रा
२	कुंतमुद्रा°	६ वासुदेवाख्या°	११ गालिनीमुद्रा°	१६ सन्निरोधनी°	२१ धेनुमुद्रा°	२६ धूपमुद्रा°	३१ व्यानमुद्रा°
३	कुंभमुद्रा°	७ सौभाग्यदंडिनी	१२ मत्स्यमुद्रा°	१७ सम्मुखीकरणी	२२ परमीकरणी°	२७ तत्त्वाख्यमुद्रा	३२ उदानमुद्रा°
४	तत्त्वमुद्रा	८ रिपुजिह्वाग्रगा°	१३ आवहनी	१८ सकलीकरणी	२३ लेलिहानामु°	२८ तत्त्वामुद्रा°	३३ समानमुद्रा

३४ प्रासमुद्रा०
३५ लिंगमुद्रा०
३६ योनिमुद्रा०
३७ त्रिशूलमुद्रा०
३८ मालामुद्रा०
३९ वरमुद्रा०
४० अभयमुद्रा०
४१ मृगीमुद्रा०
४२ खट्वांगमुद्रा०
४३ कपालमुद्रा०
४४ डमरुमुद्रा०

४५ शंखमुद्रा०
४६ चक्रमुद्रा०
४७ गदामुद्रा०
४८ पद्ममुद्रा०
४९ वेणुमुद्रा ०
५० श्रीवत्समुद्रा०
५१ कौस्तुभमुद्रा
५२ वनमालामुद्रा
५३ ज्ञानमुद्रा०
५४ विल्वमुद्रा०
५५ गारुडमुद्रा

५६ नृसिंहमुद्रा०
५७ वाराहमुद्रा०
५८ हयग्रीवमुद्रा०
५९ धनुर्मुद्रा०
६० वाणमुद्रा०
६१ शरमुद्रा०
६२ परशुमुद्रा०
६३ मोहनीमुद्रा
६४ काममुद्रा०
६५ अथगणेशमुद्रा
६६ दन्तमुद्रा०

६७ पाशमुद्रा०
६८ अंकुशमुद्रा०
६९ विघ्नमुद्रा०
७० लड्डुकमुद्रा०
७१ वीजमुद्रा
७२ खड्गमुद्रा०
७३ चर्म्ममुद्रा०
७४ मुशलमुद्रा०
७५ दौर्गीमुद्रा०
७६ संक्षोभमुद्रा

७७ द्रावणमुद्रा
७८ आकर्षण०
७९ वश्यकरण०
८० उन्मादनमु०
८१ महांकुशःमु०
८२ खेचरीमुद्रा०
८३ वीजमुद्रा०
८४ योनिमुद्रा०
८५ अस्त्रमुद्रा०
८६ मालामुद्रा
८७ वीणामुद्रा०

८८ पुस्तकव्याख्या
८९ भूजिनीमुद्रा०
९० महायोनिमुद्रा०
९१ वीजमुद्रा०
९२ दैत्यधूमनी०
९३ लेलिहानामुद्रा०
९४ लक्ष्मीमुद्रा०
९५ सप्तजिह्वामु०
९६ शूकरीमुद्रा०
९७ हंसीमुद्रा
९८ मृगीमुद्रा०

९९ सार्थनामु०
१०० संहारमुद्रा०
१०१ असनिमुद्रा
१०२ नादमुद्रा०
१०३ विस्मयमुद्रा
१०४ विन्दुमुद्रा०
॥ इतिमुद्रानामा
नि समाप्तम्०
॥ सम्पूर्णम्०
॥ शुभमस्तु०
॥ श्रीरस्तु ॥

मुद्राप्रकाश

श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपास दाऊअग्निहोत्रीकेसि
द्धविनायकयंत्रमेमुद्राप्रकाशछापागयालिखंश्रीधरमिश्रछापनेवाला वचनू
जिसेलेनाहोयउसेढुंढिराजगणेशकेपासदाऊअग्निहोत्रीकेदुकानपर
मिलैगा संवत १९४१ मि॰ पोषकृष्ण ५